As बुद्धिजः 'born through understanding', संस्कारजः 'born of habit', दुःखजः 'born through pain'. अदृष्टजः "result of the past karmas (adrishta)"

Note.—Why do we say 'when not denoting a genus'? Observe हस्तिनो जातः 'born of elephant', अश्वाज्जातः 'born of horse'.

३३०९ । उपसर्गे च संज्ञायाम् । ३ । २ । ९९ ।

'प्रजा स्यात्संततौ जने'

3009. The affix ड comes after the verb जन् with a past signification, when an upasarga is in composition and when the sense is simply appellative.

The term here being simply appellative, and not descriptive, cannot be explained by giving the signification of its component elements. As प्रजा *'people', or 'a son', as in the sentence* प्रजा स्यात्संततौ जने (Amarakosha III, 3. 32)

३०१० । अनौ कर्मणि । ३ । २ । १०० ।

अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात् । पुमांसमनुरुध्य जाता पुमनुजा ।

3010. The affix ड comes after the verb जन् with a past signification, when the root takes the preposition अनु and is compounded with a word in the accusative case.

As पुमनुजा 'a girl born after the male child, *i. e.*, a girl having an elder brother', स्त्र्यनुजः 'a boy born after the female child, *i.e.*, a boy having an elder sister'.

३०११ । अन्येष्वपि दृश्यते । ३ । २ । १०१ ।

अन्येष्वप्युपपदेषु जनेर्डः स्यात् । अजः । द्विजः । ब्राह्मणजः । क्षत्रियजः । अपिशब्दः सर्वोपाधिव्यभिचारार्थः । तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित् । परितः खाता परिखा ।

3011. The affix ड is seen to come after the verb जन् with a past signification, though it be in preposition with other nouns, having cases other than those mentioned in the previous sûtras.

Thus the locative case has been dealt with in sûtra III. 2. 97; but the affix comes when the upapada has any other case than the seventh. As न जातः = अजः 'unborn', द्विर्जातः = द्विजः 'twice-born'.

Thus, it is said in sûtra III. 2. 98 that the upapada may be in the ablative case when genus is not denoted. We see, however, the affix employed when genus is denoted. As ब्राह्मणजो धर्मः, क्षत्रियजं युद्धम् ।

It is declared in sûtra III. 2. 99 that when appellative is meant, the affix ड comes after the compound verb जन्. We find, however, the affix employed when the sense is not simply appellative, as [illegible] or [illegible] 'born or produced all round, *i. e.*, hair'.

It is declared in sûtra III 2 100 'When an object is in composition with the verb जनन्‌ this affix is employed But it may also be employed when no object is in composition As अनुजः born after i e younger brother

The force of the word अपि though is to free this rule from all restrictions and conditions So this affix comes after other verbs and other cases in composition with such verbs As परितः खाता=परिखा 'a moat (literally that which has been dug all round) खाता a pond

The Past Participles

३०१२ । क्तक्तवतू निष्ठा । १ । १ । २६ ।

एतौ निष्ठासंज्ञौ स्तः ।

3012 The affixes kta and ktavatu are called Nishthâ

३०१३ । निष्ठा । ३ । २ । १०२ ।

भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्‌ । तत्र तयोरेव- (२८३३) इति भावकर्मणोः क्तः । कर्तरि कृत्‌' (२८३२) इति कर्तरि क्तवतुः । उकाविती । स्नातं मया । स्तुतस्त्वया विष्णुः । विष्णुर्विश्वं कृतवान्‌ ।

3013 The affixes called निष्ठा come after a verbal root, employed with the sense of past time

By III 4 70 S 2833 the affix kta denotes state and object i e it is Passive Participle while the ktavatu is Active Participal affix by virtue of III 4 67 S 2832 The उ and क s are इत्‌ the real affixes are त and वत्‌ । As स्नातं मया bathed by me स्तुतस्त्वया विष्णुः Vishnu was praised by thee विष्णुर्विश्वं कृतवान्‌ Vishnu made the universe As कृ+क्त=कृतम्‌ made कृ+क्तवतु=कृतवत्‌ 1st sing कृतवान्‌ done, so also भुक्तम्‌ and भुक्तवान्‌ eaten

३०१४ । निष्ठायामण्यदर्थे । ६ । ४ । ६० ।

ण्यदर्थो भावकर्मणी ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात्‌ ।

3014 A long is substituted for the इ of क्षि before the Passive Participle in क्त when it has not the sense of the future Passive Participle in ण्यत्‌ ।

Note—The force of ण्यत्‌ is to denote condition (Impersonal action) and object (passive) When the Past Participle has not the force of ण्यत्‌ the vowel of क्षि is lengthened Thus आक्षीणः प्रक्षीणः परिक्षीणः all used in the active sense The क्त is added to the Intransitive क्षि to denote the agent (III 4 72) Thus प्रक्षीणमिदं देवदत्तस्य this is the spot where Devadatta perished Here क्त is used with a Locative force (III. 4 76) Why do

we say not having the force of यवत्? Observe अक्षितमक्षिमामेवेहा ॥ Here त is added with the force of condition and akshitam means imperishable. The vowel not being lengthened the त is not changed to न (VIII 2 46)

३०१५ । क्षियो दीर्घात् । ८ । २ । ४६ ।

दीर्घात्क्षियो निष्ठातस्य न स्यात् । क्षीणवान् । भावकर्मणोस्तु क्षितः कामो मया । श्युकः किति (२३८१) । श्रित श्रितवान् । भूत भूतवान् । वृत । * ऊर्णोतेर्वृद्धावो वाच्यः * । तेन एकाच्त्वान्नट् । ऊर्णुतः । युतः । वृतः ।

3015 The त of Nishthâ is changed to न after क्षि when the root vowel is lengthened

Thus क्षीणाः क्लेशाः क्षीणो जाल्मः, क्षीणतपस्वी ॥ The vowel of क्षि is lengthened by VI 4 60 and 61

Why do we say when the vowel is lengthened? Observe अक्षितमसि मामेवेहाः ॥ The word अक्षित is formed with क्त in the sense of भाव and means imperishable The Nishthâ being added in the sense of यवत् there is no lengthening of the vowel by VI 4 60

The root क्षि includes the two roots क्षि क्षये and क्षि निवासगत्योः ॥ As क्षितः कामो मया ॥ See also the commentary of Sâyana on अक्षितो तिः यनद्गिन वाजमिन्द्रः सहस्रिण ॥ (Rig I 5 9)

३०१५ । क । श्र्युक किति । ७ । २ । ११ । S 2381

Karika —वाच्य ऊर्णोतेर्वृद्धावो यङ्प्रसिद्धिः प्रयोजनम् । आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥

3015A The augment इट् is not added to an affix having an indicatory क when it comes after the root श्रि or after a monosyllabic root ending in उ ऊ ऋ or ॠ in the Dhâtupâtha

As श्रित्वा श्रितः श्रितवान् ॥ So also with roots ending in उक vowels as युत्वा युतः युतवान् लूत्वा लूनः लूनवान्, वृत्वा वृतः वृतवान् तीर्त्वा तीर्णः तीर्णवान् ॥ भूतः । भूतवान् । युतः ॥

Why श्रि and उक् ending roots only? Observe विदितः ॥ Why having an indicatory क्? Obs rve श्रयिता श्रयितुं श्रयितव्यम् ॥ Some read two क s in the sûtra and would apply it to the indicatory ग् also as भूष्णु (III 2 139)

Karika —ऊर्णु is treated as if it was णु when the affix यङ् is to be applied आम् is to be prohibited or इट् is to be debarred

The √ûrnu being thus treated as a monosyllabic root does not get इट् । Thus ऊर्णुतः । So also युतः । वृतः ।

३०१६ । रदाभ्यां निष्ठातो नः पूर्वस्य च दः । ८ । २ । ४२ ।

रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात् । निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च । न्न । ऋ । इत्- (२३८०) । स्तरः । स्तरणः । शीर्णः । अरिरङ्गगवत पूर्वैरुदिष्टस्वामभूत् । इत्वापवं स्तः मैं । भिन्नः । छिन्नः ।

3016 After र and द for the त of the participial suffix क्त and क्तवत् there is substituted न and the same substitution takes place also for the preceding द ॥

After र—आस्तीर्णम्, विस्तीर्णम्, विशीर्णम्, विगीर्णम्, अवगूर्णम् ॥ Thus from √स्तॄ we get स्तॄ+क्त=स्तिर्+क्त (VII 1 100 S 2390)=स्तिर्+त (I 1 51 S 70) स्तिर्+न (VIII 2 42 =S 3016)=स्तीर्णं ।

Note.—Why do we say 'after र and द'? Observe कृतः, कृतवान् ॥ The word र here does not denote the common *sound* र, which would include ऋ also, but the consonant र ॥ But even if र् be taken a common sound name including र् and ऋ yet the ण change does not take place in कृत, &c, because between त and the र् sound, there intervenes vowel-sound ऋ, for ऋ is sounded not like pure र्, but र्+ a vowel sound

Note—Why do we say "of the Participial suffix"? Observe कर्ता हर्ता ॥

Note—Why do we say "for the त"? Observe चरितम्, मुदितम् ॥ Here the त of the Nishthâ does not follow *immediately* after र् the augment इट् intervenes

Note—Why do we say "of the preceding"? The succeeding द will not be changed. As भिन्नवद्भ्याम् भिन्नवद्भिः ॥

In the word कार्तिः the descendant of कृत the त of Nishthâ is immediately preceded by र्, but no change has taken place, because the Vriddhi, by which ऋ is changed to आर्, is Bahiranga and consequently asiddha, and for the purposes of न change, the र् so obtained is invalid For the Vriddhi is ordained because of the इ of इञ् added to कृत and it lies *outside* of the nishthâ त, and so is Bahiranga

After द—भिन्नः, भिन्नवान् छिन्नः, छिन्नवान् from भिद् and छिद् ॥

३०१७ । संयोगादेरातो धातोर्यण्वतः । ८ । २ । ४३ ।

निष्ठातस्य नः स्यात् द्राणः । ग्लानः ।

3017 For the त of the Nishthâ there is substituted न, after a root ending in आ and commencing with a conjunct consonant if the latter contain a semi-vowel.

Thus from √द्रा कुत्सायाम् we have द्राणः, द्राणवान् ॥ ग्लानः ॥ ग्लानः, ग्लानवान् from ग्लै ॥ These roots द्रा and ग्ला end in आ have a conjunct consonant in the beginning one of which is a semi-vowel र and ल ॥

३०१८ । ल्वादिभ्यः । ८ । २ । ४४ ।

एकविंशतेर्लूञादिभ्यः प्राग्वत् । लूनः । ज्या । 'ग्रहिज्या' (२४१२) । जीनः । '* दुग्वोर्दीर्घश्च *' । 'टु गतौ' । दूनः । 'टु उपतापे' इत्यस्य तु न ग्रहणं सानुबन्धकत्वात् । 'दुतम्' इति भाष्यम् । गूनः । '* पूञो विनाशे *' । पूना यवाः । विनष्टा इत्यर्थः । पूतमन्यत् । '* सिनोतेर्ग्रासकर्मकर्तृकस्य *' । सिनो ग्रासः । 'ग्रास' इति किम् । सिता पाशेन सूकरी । 'कर्मकर्तृक-' इति किम् । सितो ग्रासो देवदत्तेन ।

3018 The त of Nishthâ is changed to न, after the root लू and the twenty roots that follow it

These roots belong to Kryâdi class, and commence from लूञ् छेदने (IX 13) and end with वृ वरणे (IX 32)

Thus लूनः, लूनवान् धूनः, धूनवान् from ज्या जीनः, जीनवान् the vocalisation is by VI 1 16 S 2412

Note —After a root ending in ॠ or ॠ and after a root of Luâdi class, the त of the affix क्तिन् is changed to न like as in Nishthâ Thus कीर्णिः, गीर्णिः शीर्णिः, लूनिः, पूनिः ॥ These are from कॄ (IX 26) गॄ (IX 28) शॄ (IX 18) लू and पूञ् ॥

Vârt —The vowel of the roots दुग्वौ (Bhu 991) and दु (Bhu 997) are lengthened before the Nishthâ which is changed to न ॥ As आदूनः, विगूनः ॥ The root दु 'to heat' (Sva 10) has an indicatory उ and is therefore not taken Its Nishthâ त is not changed to न । As दुतः in दुदुतया दुतया (Mâgha)

Vârt —The न change takes place after पूञ् 'to destroy (Bhu 1015). As पूना यवाः = विनष्टाः ॥ But पूतं धान्यं from पूञ् to purify (IX 12).

Vârt —The same change takes place after the root सि बन्धने of Svâdi class No 2 when used in a Reflexive sense of becoming a morsel fit for swallowing As सिनो ग्रासः स्वयमेव, i e, where a morsel by being mixed with curd, condiment &c becomes rounded of itself, there this form is used: अभ्यवहार्यः पिण्डीक्रियमाणो ग्रासो, यदा दध्यादिव्यञ्जन मयेन तदानुकूल्य प्रतिपद्यते तदाऽयम् प्रयोगः ॥ But when not used in this sense, we have सिता पाशेन सूकरी 'the she hog is bound in the noose' Moreover, the ग्रास must be the object and not the subject of the verb. Therefore not here सितो ग्रासो देवदत्तेन ॥

३०१९ । ओदितश्च । ८ । २ । ४५ ।

भुजो भुग्नः । टुओश्वि । उच्छूनः । ओहाक् । प्रहीणः । 'स्वादय ओदितः' इत्युक्तम् । सूनः-सूनवान् । दूनः-दूनवान् । ओदित्मध्ये डीङ पाठसामर्थ्यान्नेट् । उड्डीनः ।

3019 The त of Nishthâ is changed to न after a root, which has an indicatory ओ in the Dhâtupâtha

Thus from √bhuj o (Tud 124), : भुग्न । भुग्नवान् । √tu o svi (Bhu 1059) उच्छूनः । उच्छूनवान् : √o hâk (Juha 8) — प्रहीणः

So also ओलस्जी—लग्नः, लग्नवान् ओविजी—उद्विग्नः, उद्विग्नवान् ॥ ओप्यायी वृद्धौ—आपीनः आ पीनवान् ॥

The roots षूङ् प्राणिप्रसवे (Div 24) &c are considered as ओदित् See Divâdi root 24 Thus सूनः सूनवान्, दूङ्—दूनः दूनवान्, दीङ—दीनः, दीनवान्, डीङ्—डीनः डीनवान्, धीङ्—धीनः धीनवान्, मीङ्—मीनः, मीनवान्, रीङ्—रीणः, रीणवान्, लीङ्—लीनः लीनवान्, व्रीङ्—व्रीणः व्रीणवान् ॥

The root डी which otherwise takes इट् does not do so in the Nishthâ, as it is included in the ओदित् class Thus उड्डीनः ॥

३०२० । द्रवमूर्तिस्पर्शयोः श्यः । ६ । १ । २४ ।

द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः संप्रसारणं स्यान्निष्ठायाम् ।

3020 There is vocalisation of the semivowel of the root श्या (श्यै) 'to go' when the nishthâ affixes follow, when the sense is "coagulation" or 'cold to touch'

The word द्रवमूर्ति means hardening of a fluid by coagulation &c.

Thus श्यै+क्त=शि+क्त। Now applies the following sûtra by which the nishthâ त is changed to न।

३०२१ । श्योऽस्पर्शे । ८ । २ । ४७ ।

श्यैङो निष्ठातस्य नः स्यादस्पर्शेऽर्थे । 'हलः' (२५५९) इति दीर्घः । शीनं घृतम् । 'अस्पर्शे' किम् । शीतं जलम् । 'द्रवमूर्तिस्पर्शयोः' किम् । संश्यानो वृश्चिकः शीतात्संकुचित इत्यर्थः ।

3021 The Nishthâ त is changed to न after श्यै but not when the Participle denotes 'cold to the touch'

Thus शि+त=शि+न=शीन (the lengthening is by VI 4 2 S 2559) as शीनं घृतं 'frozen butter'

Why do we say 'not cold to the touch'? Observe शीतं जलम् 'cold water' Why do we say 'there is vocalisation when meaning 'coagulation' and 'cold to touch''? There is no vocalisation when the sense is not that of 'coagulation' or 'cold', as संश्यानो वृश्चिकः 'the rolled up scorpion' The short इ is lengthened in शीन &c by VI 4 2 S 2559

The word स्पर्श is a guna word formed by घञ् and denotes the particular guna or sensation to be sensed through the organ of touch In this sense it is derived from the root स्पृश संस्पर्शने। It also denotes a disease, derived from स्पृश उपतापे। There is nothing to show what स्पर्श is meant in the sûtra Explanation is the only refuge here

३०२२ । प्रतेश्च । ६ । १ । २५ ।

प्रतिपूर्वस्य श्यः संप्रसारणं स्यान्निष्ठायाम् । प्रतिशीनः ।

3022 There is vocalisation of श्या preceded by the upasarga प्रति when the nishthâ affixes follow

Thus प्रतिशीनः प्रतिशीनवान्। This sûtra applies to cases where the words need not have the meaning of 'coagulation' or 'cold'

३०२३ । विभाषाभ्यवपूर्वस्य । ६ । १ । २६ ।

श्यः संप्रसारणं वा स्यात् । अभिश्यानं अभिशीनम् घृतम् । अवश्यानः अवशीनो वृश्चिकः । व्यवस्थितविभाषेयम् । तेनेह न । समवश्यानः ।

3023 There is optionally the vocalisation of श्या followed by the Nishthâ affixes when the upasargas अभि and अव precede it

Th is अभिमीनम् or अभिरयानम् पर्त अवमीनो or अवश्यानो वृश्चिकः ॥ This option appl s even when th word means coag ilation and cold As (1) अवमोनं or अवश्यानं घृतं मेदः ॥ अवमीतो or अवश्यानो वायुः &c अवमीनं or अवश्यानमुदकं ॥

Th पूर्व in this sû ra serv s the same p irpose as in VI 1 2? Thus अभिसंमीनं or अभिसंश्यानं अवसंमीनं अवसंश्यानं ॥ The word पूर्व shows tl at it is a vyavasthita vibhâsh â hence there is no option allowed when अभि and अव are in the mid lle as समभिश्यानं समवश्यानः ॥ Here we cannot have the alternative forms समभिमानं &c

३०२४ । अञ्चोऽनपादाने । ८ । २ । ४८ ।

अञ्चो निष्ठातस्य नः स्यान्न त्वपादाने ।

3024 The Nishthâ त is changed to न after अञ्च्, but not when it is in connection with an Ablative case

Thus समक्नौ शकुनेः पादौ=सङ्गतौ, तस्मात् पयो न्यक्नः ॥ The इट् augment is not added in समक्नः by the following

३०२५ । यस्य विभाषा । ८ । २ । १५ ।

यस्य क्वचिद्विभाषयेड् विहितस्ततो निष्ठाया इण्न स्यात् । उदितो वा (३३२८) इति क्त्वायां वेट्त्वादिह नेट् । समक्नः । अनपादाने किम् । उदक्तमुदकं कूपात् । नत्वस्याविद्वत्वात् पूर्व-(२८४) इति वस्वे मते । * निष्ठायां परवस्वरत्वयेड् विभिषु विद्धो वाच्यः * । वृक्णः । वृक्णवान् ।

3025 The Participial affixes do not take इट् after those roots, to which another suffix can optionally be added, with or without this augment इ ॥

That is a root which is option lly Set before other affixes is *invariably* anit before Nishthâ Thus by VII 2 44 वल् consonant beginning affixes are optionally सेट् after the roots धू &c. The Nishthâ after धू &c will be invariably anit Thus विधूतः विधूतवान् गुहः गूढवान् ॥ By VII 2 56 S 3328 the roots having an indicatory उ *optionally* are followed by Set क्त्वा ॥ The Nishthâ after उदित roots will *invariably* be anit as समक्नः (from ✓anchu i honour)

No —By the vârtika सनि पदि इरिद्राद्युपसंख्यानम् the roots तन् पत and दरिद्रा take optional इट् in the D siderative (VII 2 49) Though पत is a root which thus *optionally* takes इट् in the Desiderative yet its Ni hthâ is always सेट् for Pânini h mself has employed the word पतित in sûtra II 1 24 38 According to Padamanjari this rule of यस्य विभाषा is anitya and not of universal application Because had this rule been of universal application then the root कृत which is *optionally* anit by VII 2 57 would be *universally* anit by the present sûtra and there would be no necessity of reading it with a long ई in the Dhâtupâṭha, as कृती वेष्टने (VI 141) to make its nishṭhâ aniṭ under VII 2 14.

Why do we say in S. 3024 'when not in construction with an Ablative case'? Observe उदक्तमुदकं कूपात्=उद्धृतं 'drawn out'.

The word अक्त is *from* the root अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, and not *from* the root अञ्चु; and hence the Nishṭhâ is not changed.

The change of त *into* न *is* ordained by a Tripâdi rule (VIII. 2. 43 &c.) and therefore it is considered asiddha (VIII. 2. 1. S 12), and therefore the श् of √vraśch requires to be changed to ष before न by VIII. 2. 36. S. 294. This is, however, prevented by the following.

Vart.—The substitute of the Nishṭhâ affixes should be considered as valid or siddha for the purposes of the rules relating to the (1) changing of ष to क्, (2) accent (3) affix, and (4) इट् augment. As (1) वृक्णः, वृक्णवान् ॥ The root is ओव्रश्चू (Tudâdi 11) the indicatory ओत् shows that the nishthâ त is changed to न (VIII. 2. 45. S. 3019). This nishthâ substitute is considered as valid or siddha, and the final of the root is not changed to ष, as it otherwise would have been by VIII. 2. 36. S. 294. for न would have been still considered as त or a झल् letter. *The equation is as follows* :—व्रश्च्+त= वृश्च्+त (VI 1. 16)=वृश्च्+न (VIII 2. 45)=वृष्+न (VII. 2. 29)=वृक्+न (VIII. 2. 30)=वृक्णः (VIII. 4. 1) The ष् is changed to क् by VIII. 2. 30, by considering न as asiddha and therefore equal to त of a झल् letter. Thus it will be seen that this न is असिद्ध for the purposes of rule VIII. 2. 30, but it is सिद्ध only for the purposes of rule VIII. 2 36.

३०२६ । परिस्कन्दः प्राच्यभरतेषु । ८ । ३ । ७५ ।

पूर्वेण मूर्धन्ये प्राप्ते मूर्धन्याभावो निपात्यते । परिस्कन्दः । 'प्राच्य-' इति किम् । परिष्कन्दः– परिस्कन्दः । 'परेश्च' (२३९९) इति विकल्पः । 'स्कन्भेः' (२३९२) इति षत्वे प्राप्ते ।

3026. The word परिस्कन्दः is used without the cerebral change in the country of Eastern Bharata.

This is an anomaly. The ष required by the VIII. 3. 74 S. 2399 is prohibited. The other *form* is परिष्कन्दः ॥ The word परिस्कन्द *is formed* by the affix अच् or it is a Nishṭhâ, the त being elided. The word [illegible] qualifies the word प्राच्य ॥

Prof. Bohtlingk translates it "परिस्कन्द is seen in the [illegible] of the Eastern People and the Bharata". He bases his construction on the sûtras II. 4 66, and IV. 2. 113, where प्राच्यभरतेषु means "the Eastern People and Bharata".

Why do we say 'Eastern'? Observe परिष्कन्दः or परिस्कन्दः । The double form is by the option of VIII. 3. 74 S. 2399.

The स of √स्तम्भ required to be changed [illegible]
The following sûtra prevents that.

३०२७ । प्रतिस्तब्धनिस्तब्धौ च । ८ । ३ । ११४ ।

अत्र षत्वं न स्यात् ।

3027 The words प्रतिस्तब्ध and निस्तब्ध are anomalous

In these words the स is not changed to ष though so required by VII 3 67 S 2272

३०२८ । दिवोऽविजिगीषायाम् । ८ । २ । ४९ ।

दिवो निष्ठातस्य नः स्यादविजिगीषायाम् । द्यूनः । विजिगीषायां तु । द्यूतम् ।

3028 The Nishthâ त is changed to न after दिव् when the sense is not that of 'play'

The word विजिगीषा means ' desire of conquest or gain , but here it means gambling

Thus आद्यूनः = औदरिकः परिद्यूनः = क्षीणः ॥ Why do we say when it deos not mean to play ? Observe द्यूतं वर्तते ॥ Here the throwing of dice is with the desire of winning or gaining victory (vijigîshâ) over the opponent.

३०२९ । निर्वाणोऽवाते । ८ । २ । ५० ।

अवात इति च्छेदः । निपूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्ता न । निर्वाणोऽग्निर्मुनिर्वा । वाते तु निर्वातो वातः ।

3029 The word निर्वाण is irregularly formed by changing the Nishthâ त to न when the 'wind is not the agent of the verb

The word निर्वाण is formed the root वा with the preposition निर् and the Participial affix त ॥ Thus निर्वाणोऽग्निः = उपशान्तः निर्वाणः प्रदीपः निर्वाणो भिक्षुः = उपरतः ॥

Why do we say when not meaning the wind ? Observe निर्वातो वातः निर्वातं वातेन ॥

In the sentences निर्वाणः प्रदीपो वातेन निर्वाणोऽग्निर्वातेन the न change has taken place because the location of the verb वा is in the प्रदीप and अग्नि and not in the वात which is merely an Instrument. Hence the above Vritti uses the words if the sense of the verb वा has not the word वात as its agent

३०३० । शुषः कः । ८ । २ । ५१ ।

निष्ठात इत्येव । शुष्कः ।

3030 क is substituted for the Nishthâ त after the root शुष् ॥

As शुष्कः शुष्कवान् ॥

३०३१ । पचो वः । ८ । २ । ५२ ।

पक्वः ।

3031 व is substituted for the Nishthâ त after the root पच् ॥

As पक्वः पक्ववान् ॥

३०३२ । क्षायो मः । ८ । २ । ५३ ।

क्षामः ।

3032 म is substituted for the Nishthâ त after the root क्षै ॥ Thus क्षामः क्षामवान् ॥

३०३३ । स्त्यः प्रपूर्वस्य । ६ । १ । २३ ।

प्रस्त्यः संप्रसारणं स्यान्निष्ठायाम् ।

3033 The verb स्त्या (स्त्यै and ष्ट्यै) when preceded by प्र changes its semivowel to a vowel, when a Nishthâ affix follows

The phrases "when the nishthâ follows", and there is vocalisation' are understood here The anuvritti of स्फी does not run here The roots स्त्यै and ष्ट्यै both assume the form स्त्या and are included here Thus प्र+स्त्या+क्त=प्र+स्ति+त (VI 1 108)=प्रस्तीतः (VI 4 2), and प्रस्तीतवान् ॥ The त of nishthâ affix would have been changed into न् by VIII 2 43 in as much as the root स्त्या has a semivowel and ends in long आ ॥ But by the vocalisation of य the condition of यण्वत् for the application of VIII 2 43, no longer existing the affix त is not changed to न ॥ But त is optionally changed to म by VIII 2 54 below as प्रस्तीमः and प्रस्तीमवान् ॥

३०३४ । प्रस्त्योऽन्यतरस्याम् । ८ । २ । ५४ ।

निष्ठातस्य मो वा स्यात् । प्रस्तीमः-प्रस्तीतः । 'प्राद्' किम् । स्त्यानः ।

3034 म is optionally substituted for the Nishthâ त after the root स्त्यै preceded by प्र ॥

This is प्रस्तीमः or प्रस्तीतः प्रस्तीमवान् or प्रस्तीतवान् ॥ In the second alternative when म does not come we first vocalise the root स्त्या into स्ती and then add त ॥ Had Samprasârana not taken place first then the Nishthâ त would have been changed to न after स्त्या by VIII 2 43 But when Samprasârana is once made, the root no longer has a semivowel and so there remains no occasion for the application of VIII 2 43.

Why do we say 'when preceded by प्र?' Observe संस्त्यानः (VIII 2 43) संस्त्यानवान् ॥ If it was intended that vocalisation should take place when प्र singly stood before then the sûtra could well have run thus प्रस्त्यः ॥ The use of the word पूर्वस्य implies that the rule applies when प्र stands first, though other upasargas may intervene between it and the root. Thus प्रसंस्तीतः प्रसंस्तीतवान् ॥ The compound प्रपूर्वस्य should be explained as a Bahuvrihi=प्रः पूर्वो यस्य धातूपसर्गसमुदायस्य स प्रपूर्वः (that which consisting of root and upasarga is preceded by प्र is called प्रपूर्व) Therefore the rule is made applicable to प्रसंस्तीतः &c.

३०३५ । अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः । ८ । २ । ५५ ।

ञिफला । फुल्लः । निष्ठातस्य लत्वं निपात्यते । क्तवत्वेकदेशस्यापीदं निपातनमिष्यते । फुल्लवान् । क्षीबादिषु तु क्तप्रत्ययस्यैव तलोपः । तस्याऽसिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते । क्षीबो मत्तः । कृशस्तनुः । उल्लाघो नीरोगः । 'अनुपसर्गात्' किम् ।

3035 The irregular Participles फुल्ल 'blown,' क्षीब 'drunk, mad' कृश 'lean' and उल्लाघ 'healthy' are formed then only, when no Preposition precedes them

The word फुल्ल is derived from the root ञिफला विशरणे the त is changed to ल ॥ The change of अ to उ (VII 4 88), and the want of इट् augment (VII 2 16) are regular The same change takes place before क्तवतु also as फुल्लवान् ॥

The affix त is elided after the roots क्षीबृ, कृश् and उत्—लाघृ, and as the elision is asiddha there would have been इट्, but as an anomaly the augment इट् is prohibited also, this is the irregularity in क्षीबः, कृशः and उल्लाघः ॥

Why do we say when not preceded by a Preposition? Observe (प्रफुल्लाः सुमनसः प्रक्षीबितः प्रकृशितः, प्रोल्लाघितः ॥ In the case of लाघृ, prepositions other than उत् are prohibited)

३०३६ । आदितश्च । ७ । २ । १६ ।

आकारेतो निष्ठाया इण्न स्यात् ।

3036 The Participial affixes do not get इट् augment after a root which has an indicatory आ ॥

The root ञिफला has an indicatory आ and so its nishthâ will not take इट् । Thus फल्+क्त । Now applies the following by which the अ of फ is changed to उ ॥

Note —As ञिमिदा—मिन्नः मिन्नवान्, ञिक्ष्विदा—क्ष्विण्णः क्ष्विण्णवान् ञिष्विदा—स्विन्नः स्विन्नवान् ॥ The च implies that other roots not enumerated are to be also included as आरब्धः दान्तः ॥

Note —This and the sûtra following it in the Ashtâdhyâyî could have been made into one, as आदितश्च विभाषा भावादिकर्मणोः ॥ The separate making of two sûtras indicates that the rule of यस्य विभाषा (VII 2 15) applies with the restrictions and limitations of the rule ordaining 'option', i e the prohibition of इट् augment, with regard to the participial affixes is limited by the same conditions, which apply to the optional employment of इट् before other affixes in the विभाषा rules (यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः) ॥ Thus VII 2 68 ordains इट् optionally to the affix वसु after the roots गम् हन् विद् and विश् ॥ The root विद् there is the Tudâdi root meaning 'to acquire'. The rule यस्य विभाषा will apply to this विद् with this meaning and not to विद् meaning 'to know' the Past Participles of which are विदितः, विदितवान् ॥

३०३७ । ति च । ७ । ४ । ८९ ।

चरफलोरत उत्स्यात्तादौ किति । प्रचूर्त्तः । प्रचूर्तिः । प्रफुल्तिः । प्रोत्फुल्तिः । कथं तर्हि 'लोध्रद्रुमं सानुमतः प्रफुल्लम्' इति । 'फुल्ल विकसने' पचाद्यच् । सूत्रं तु फुल्तादिनिवृत्त्यर्थम् । "उत्फुल्लसंफुल्लयोरुपसंख्यानम्" ।

3037 उ is substituted for the vowel of चर् and फल् before an affix beginning with त having an indicato y क ॥

Thus प्रफुल्तः (=चरत्व or कथया) प्रफुल्तः and प्रफुल्तिः ॥ The anuvṛitti of चफ् घुमोरत्यतरस्याम् deos not apply here, though present. See VIII. 2 55.

Thus फल्+त=फुल्+त=प्रफुल्तः । so also प्रचीर्तिः । प्रफुल्तिः । प्रोत्फुल्तिः । How do you explain the form प्रफुल्लम् in लोध्रद्रुमं सानुमतः प्रफुल्लम् । (Raghu II. 29) It is not the Passive Part. of विकसन, but a derivatve of √फुल्ल 'to bloom' with the affix अच् of the Pachâdi. The present sûtra prevents the forms फुल्त, &c

Vart —The forms उत्फुल्लः and संफुल्लः should be enumerated Here त is changed to ल, though the root has taken a Preposition

In the word परिफुल्लः the word परि is not a Preposition with regard to the verb फल्, परिगतः फुल्लः=परिफुल्लः ॥ So that परि is upasarga of the verb गतः understood, hence we have the form फुल्लः ॥

३०३८ । नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् । ८ । २ । ५६ ।

एभ्यो निष्ठातस्य नो वा । नुन्नः-नुत्तः । 'विद' विचारणे रौधादिक एव गृह्यते । उन्दिना साहचर्यात् । विन्नः-वित्तः । वेत्तेस्तु विदितः । विद्यतेर्विन्नः । उन्दी ।

3038 The Nishṭhâ त may optionally be changed* to न, after नुद, विद, उन्द त्रा, घ्रा, ह्री ॥

Thus नुन्नः or नुत्तः, विन्नः or वित्तः, (समुन्नः, or समुत्तः, त्राणः or त्रातः, घ्राणः or घ्रातः, ह्रीणः or ह्रीतः) ॥

* With regard to ह्री, the न change was not ordained by any rule, and so it is an aprâpta vibhâshâ With regards to others, the न change would have *always* taken place by VIII 2. 42 and 43, this makes it optional.

The root विद् विचारणे of Rudhâdi is to be taken here, and not other विद roots, because it is read along with √undî which belongs to that class

Thus Nishṭhâ of विद्—वेत्ति of Adâdi class is विदितः, (2) of विद्—विद्यते, of Divâdi class is विन्नः only, (3) of विद् of Tudâdi is विन्नः, (4) of विद् of Rudhâdi are both वित्तः and विन्नः ॥ The Tudâdi विद् has also the form वित्तः in the sense of भोग by VIII 2. 58

The root उन्द is read in the Dhâtupâṭha with an indicatory long ई, the force of which is explained in the following sûtra :—

३०३९ । श्वीदितो निष्ठायाम् । ७ । २ । १४ ।

श्वयतेरीदितश्च निष्ठाया इण्न । उन्नः–उत्तः । घ्राणः–घ्रातः । त्राणः–त्रातः । ह्रीणः ह्रीतः ।

3039 The Part cipial affixes क्त and क्तवतु (kta an l ktavatu), do not get the इट् augment after श्वि and after the root which has an indicatory ई ॥

Thus उन्द्+क्त=उन्नः or उत्तः। The Past Participle of √घ्रा (S 3038) is घ्रातः or घ्राणः। Of √त्रा (S. 3038) is त्राणः or त्रातः। Of √ह्री, ह्रीणः or ह्रीतः।

३०४० । न ध्याख्यापॄमूर्छिमदाम् । ८ । २ । ५७ ।

एभ्यो निष्ठातस्य नत्वं न । ध्यातः । ख्यातः । पूर्तः । 'राल्लोपः' । मूर्तः । मत्तः ।

3040. The Nishthâ त is not changed to न after ध्या, ख्या, पॄ, मूर्च्छ and मद ॥

Thus ध्यातः, ध्यातवान् ख्यातः, ख्यातवान् पूर्तः पूर्तवान् मूर्तः, मूर्तवान्, मत्तः, मत्तवान् ॥

This debars the न change prescribed by VIII 2 42, 43 S 3016 and 3017

The root मूर्छि is exhibited in the sûtra in its lengthened from , the root मुर्च्छ is lengthened by VIII 2 78 and the च्छ is elided before त by VI 4 21. S 2655

३०४१ । वित्तो भोगप्रत्यययोः । ८ । २ । ५८ ।

विन्दतेर्निष्ठान्तस्य निपातोऽयं भोग्ये प्रतीते चार्थे । वित्तं धनम् । वित्तः पुरुषः । 'अनयोः' किम् । विन्नः । 'विभाषा गमहन–' (३०९९) इति क्वसौ वेट्त्वादिह नेट् ।

3041 The irregularly formed Participle वित्त denotes 'possession' and 'renowned'

This is derived from विद्लृ लाभे of the Tudâdi class, the त is not changed to न though so required by VIII 2 42 S 3016

Thus वित्तमस्य बहु=धनमस्य बहु 'he has much riches'. Because riches are enjoyed (भुज्यते), so they are called भोग or 'enjoyments' *par excellence*

In the s ns of r nov e l" we have वित्तोऽयं मनुष्यः this man is renown d or famous Here वित्तः=प्रतीतः ॥ प्रतीयते=प्रत्ययः ॥

Why do we say wh n having the sense of possessi ns ' and famous ? Observe विन्नः ॥ The root is aniṭ in the Nishthâ because it is optionally सेट् before क्वसु affix by VII 2 69 S 3099 See S 3025

३०४२ । भित्तं शकलम् । ८ । २ । ५९ ।

भिन्नमन्यत् ।

3042 The word भित्त is irregularly formed in the sense of 'a fragment, a portion'

Thus भित्तं तिष्ठति भित्तं प्रवर्तते ॥ This is synonymous with शकलं ॥ The root meaning of भिद् is not very manifest in this word it may be taken as a *rudhi* word The regular form is भिन्नं under VIII 2 42 S. 3016

३०४३ । ऋणमाधमर्ण्ये । ८ । २ । ६० ।

ऋधातोः क्ते तकारस्य नत्वं निपात्यते आधमर्ण्यव्यवहारे । ऋतमन्यत् ।

3043 The word ऋण is irregularly formed in the sense of 'debt'

It is derived from ऋ the त is changed to न ॥ The word अधमर्ण is compounded from अधम ऋणे 'he who in a debt transaction holds a lower position, *i e*, a debtor ' The other form is ऋतं ' truth, right '

३०४४ । स्फायः स्फी निष्ठायाम् । ६ । १ । २२ ।

स्फीतः ।

3044 The स्फी is the substitute of स्फाय ' to swell,' when the Nishthâ affixes follow

Thus स्फीतः स्फीतवान् ॥ Why do we say " when the Nishthâ affixes follow' ? Observe स्फातिः formed by क्तिन् ॥ In the phrase स्फाती भवति, the word स्फाती is the feminine of the word स्फाति formed by क्तिन् ॥

३०४५ । क्लिशः क्त्वानिष्ठयोः... । ७ । २ । ४७ ।

निरः कुषो निष्ठायां इट् स्यात् । 'यस्य विभाषा' (३०२५) इति निषेधे प्राप्ते पुनर्विधिः । निष्कुषितः ।

3045 The augment इट् is added to the Participial affixes त and तवत after कुष् preceded by निर् ॥

As निष्कुषितवान् निष्कुषितः ॥ The special mention of इट् in the sûtra is for the sake of making its addition invariable otherwise it would have been optional, or debarred by VII 2 15 S 3025 In the subsequent Ashtâdhyâyî sûtra, the addition becomes again optional

३०४६ । वसतिक्षुधोरिट् । ७ । २ । ५२ ।

क्त्वा क्तवत्वोर्निष्ठयोर्नित्यमिट् स्यात् । उषितः । क्षुधितः ।

3046 The affix ktvâ, kta and ktavatu always receive the augment इट् after वस् (वसति) and क्षुध् ॥

As उषित्वा उषितः and उषितवान् क्षुधित्वा, क्षुधितः क्षुधितवान् ॥

Note —The वस् of the Adâdi class will get इट् as it is enumerated in the list of सेट् roots The repetition of इट् shows that the rule is invariable, the 'optionally ' of the preceding Ashtâdhyâyî sûtra does not affect it

३०४७ । अञ्चेः पूजायाम् । ७ । २ । ५३ ।

पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात् । अञ्चितः । गतौ तु अक्तः ।

3047. The affixes ktvâ, kta and ktavatu take the augmen इट् after the root अञ्चु, when meaning 'to honor or do some thing to show honor.'

As अञ्चित्वा जानु जुहोति, अञ्चिता अस्य गुरवः (III. 2 188, VI 4. 30, II 3. 67) By VII. 2. 56 अञ्चु would optionally have caused इट् to come before ktvâ and hence by VII. 2 15 S 3035 never before the Nishthâ This sûtra ordains invariable addition of this augment. Why do we say when meaning 'to honor'? Observe उदक्तमुदकं कूपात्, 'the water is raised from the well,' where √anchu means 'to go'. See VIII. 2 48 S 3024, and VII 2. 15. S. 3025.

३०४८ । लुभो विमोहने । ७ । २ । ५४ ।

लुभः क्त्वानिष्ठयोर्नित्यमिट् स्यान्न तु गार्ध्ये । लुभितः । गार्ध्ये तु लुब्धः ।

3048. The affixes ktvâ, and kta, ktavatu take इट् after the root लुभ् (Tud 22) when meaning 'entangled or confused.'

As लुभित्वा and लोभित्वा, विलुभिताः केशाः, विलुभितः सीमन्तः, विलुभितानि पदानि ॥ विमोहन = आकुलीकरण ॥ By VII 2 48 लुभ would have optionally caused इट् to come before ktvâ, and then by VII 2 15 the Nishthâ would never have been सेट् ॥ Hence this sûtra. Why do we say when *meaning 'to entangle'*? See लुब्धः वृषलः = शीतेन पीडितः, ॥ लुभ् 'to be greedy' (Div. 128) is not governed by this rule, but by VII. 2. 48. As लुब्ध्वा or लोभित्वा and लुभित्वा (1 2 26) ॥

३०४९ । क्लिशः क्त्वानिष्ठयोः । ७ । २ । ५० ।

इड्वा स्यात् । 'क्लिश उपतापे' नित्यं प्राप्ते । 'क्लिशू विबाधने' । अस्य क्त्वायां विकल्पे सिद्धेऽपि निष्ठायां निषेधे प्राप्ते विकल्पः । क्लिशितः-क्लिष्टः ।

3049. The affixes ktvâ, kta, and ktavatu, *may optionally* take इट् after क्लिश् ॥

As क्लिष्ट्वा or क्लिशित्वा, क्लिष्टः or क्लिशितः, क्लिष्टवान् or क्लिशितवान् ॥ क्लिश् (Divâdi 52) उपतापे, being anudâtta would *always* have taken इट् before ktvâ and Nishthâ Hence this rule ordains option with regard to ktvâ. क्लिशू विबाधने (IX. 50) having an indicatory ऊ would have optionally taken इट् before ktvâ by VII 2 44, but then the Nishthâ affixes by VII 2 15 would never have taken the augment.

३०५० । पूङश्च । ७ । २ । ५१ ।

पूङः क्त्वानिष्ठयोरिड्वा स्यात् ।

3050 The affixes ktvâ, kta and ktavatu optionally get इट् after पूङ् ॥

As पूत्वा or पवित्वा सोमोऽतिपूतः, सोमोऽतिपवितः पूतवान् or पवितवान्। This allows option where by VII 2 11 there would have been prohibition. See I 2. 22, given below.

When the affix takes the augment इट्, it is no longer regarded as कित्, by the following sûtra, and so there is guna.

३०५१। पूङः क्त्वा च। १। २। २२।

पूङः क्त्वा निष्ठा च सेट् किन्न स्यात्। पवितः–पूतः। क्त्वाग्रहणमुत्तरार्थम्। 'नोपधात्-' (३३२४) इत्यत्र हि क्त्वैव सम्बध्यते।

3051. The set Nishthâ and the set *ktvâ* are not *kit* after the verb pûṅ 'to purify.'

Thus पू+इट्+क्त=पो+इत=पवितः। When there is no इट्, we have पूतः।

By rule VII 2 51, S 3050 after the verb पू the Nishthâ affixes and *ktvâ* take the intermediate इ So that *ktvâ* being *seṭ* (by virtue of S 3050) would have been non kit by S 3322, and it might be asked what is the necessity of repeating it in this sûtra when I 2 18 S 3322 comprised the case. The reason of this repetition is that by mentioning *ktvâ* in this sûtra it has governing force over the succeeding Ashtâdhyâyî sûtras.

Thus in I. 2 23 S 3324 the affix ktvâ alone is taken and nothing else

३०५२। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। १। २। १९।

एभ्यः सेण्निष्ठा किन्न स्यात्। शयितः–शयितवान्। अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेश्यितः–शेश्यितवान्। '* आदिकर्मणि निष्ठा वक्तव्या *'।

3052 The set Nishtha affixes are not *kit* after the five verbs śî 'to lie down,' *svid* 'to sweat,' *mid* 'to melt,' *kshvid* 'to be unctuous,' and *dhrish* 'to offend'

Thus शयितः। शयितवान्।

The root शीङ् is read in the sûtra with its indicatory letter ङ्, in order to indicate that this rule does not apply to the Nishthâ of yan luk. Thus शेश्यितः। शेश्यितवान्।

The other four roots स्विद् (ञिष्विदा) मिद् (ञिमिदा) क्ष्विद् (ञिक्ष्विदा) and धृष् (ञिधृषा) have all a long आ as indicatory, as well as the syllable ञि These roots therefore by VII 2 16 S 3036 are *aniṭ*, and consequently beyond the scope of the operation of the present sutra As स्विन्नः, स्विन्नवान्

Though Nishṭhâ क्त is generally a Passive Participial affix denoting a Past Time, it also denotes the beginning of an action by the following vârtika

Vârtika when the beginning of an action is intended to be expressed, the Nishṭhâ affixes are employed

When *kta* denotes an Âdikarma, it loses its Passive force and becomes an Active Participle by the next sûtra Therefore when the Nishthâ ffixes denote 'a state or condition, bhâva' or beginning of action' then the above four roots optionally become *set* (VII 2 17) It is in that case that the present sûtra is applicable to them

३०५३ । आदिकर्मणि क्त· कर्तरि च । ३ । ४ । ७१ ।

आदिकर्मणि यः क्तः स कर्तरि स्यात् । चाद्भावकर्मणोः ।

3053 The affix 'kta' also denotes the agent, when it expresses a beginning of an action

The word आदिकर्मणि means 'the beginning of an action' or when the action signified by the roots is intended to be expressed merely as having been simply begun The force of च in the sûtra is to indicate that even when the beginning of an action is intended to be expressed, the क्त may be used to denote the act and the object as well

Note—When Bhâva and Âdikarma are denoted by the Nishthâ it optionally takes इट् by the following

३०५४ । विभाषा भावादिकर्मणो. । ७ । २ । १७ ।

भावे आदिकर्मणि चादितो निष्ठाया इड्वा स्यात् । प्रस्वेदितश्चैत्रः । प्रस्वेदितं तेन । 'ञि क्ष्विदा' इति भ्वादिरत्र गृह्यते मीदिभिः साहचर्यात् । दिवादेस्तु स्विदित इत्येव । 'ञिमिदा' 'ञिक्ष्विदा' दिवादी भ्वादी च । प्रमेदितः–प्रमेदितवान् । प्रक्ष्वेदितः–प्रक्ष्वेदितवान् । प्रधर्षितः–प्रधर्षितवान् । धर्षितं तेन । 'सेट्' किम् । प्रस्विन्नः । प्रस्विन्नं तेनेत्यादि ।

3054 The principal affixes after roots having an indicatory आ may optionally take the augment इट् when the affixes have an Impersonal sense, or denote the beginning of an action.

Thus the four roots ñi shvidâ ñi mida ñi kshvidâ and ñi dhrishâ become सेट् when their Participle denotes an Impersonal sense, or the beginning of an action and when the Nishthâ is not कित् by S 3052, Thus प्रस्वेदितश्चैत्रः (âdikarma) प्रस्वेदितं तेन (bhâva) The (ñi) shvid (â) of this sutra (S 3052) is the Bhuâdi root as it is read in the company of √mid √kshvid &c which have ञि indicatory It must therefore be that √svid which has an indicatory ञि and that is Bhvâdi (No 780) Of the Divâdi root स्विद् (No 79) there is no guna as स्विदितः ।

The two roots ñi midâ and ñi kshvidâ belong both to the Divâdi (Nos. (133 134) and the Bhvâdi (No 779 780 or 1027) Both are taken here Thus प्रमेदितः । प्रमेदितवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् ।

The fifth root dhrish (V 22) offers no peculiarity Thus प्रधर्षित प्रधर्षितवान् । So also धर्षितं तेन ।

Why do we say in S. 3052 the सेट् nishṭhâ '? Observe प्रस्विन्नः । प्रस्विन्नं तेन । No guna

३०५५ । मृषस्तितिक्षायाम् । १ । २ । २० ।

सेण्निष्ठा किन्न स्यात् । मर्षितः-मर्षितवान् । 'क्षमायाम्' किम् । अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः ।

3055. The seṭ Nishṭha is not *kit* after the verb mṛish when meaning 'to forbear'

Thus मर्षितः 'forborne' मर्षितवान् 'forbore.'

Why do we say 'when meaning to forbear?' When it has not this sense, the set nishṭhâ will be कित्. As अपमृषितं वाक्यमाह 'he spoke unintelligible language.'

३०५६ । उदुपधाद्भावादिकर्मणोरन्यतरस्याम् । १ । २ । २१ ।

उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात् । द्युतितम्-द्योतितम् । मुदितम्-मोदितं साधुना । प्रद्युतितः-प्रद्योतितः । प्रमुदितः-प्रमोदितः साधुः । 'उदुपधात्' किम् । विदितम् । 'भावा-' इत्यादि किम् । रुचितं कार्षापणम् । 'सेट्' किम् । कुष्टम् । 'शब्विकरणेभ्य एवेष्यते' । नेह । गुध्यतेर्गुधितम् ।

3056. The seṭ Nishṭhâ is optionally not *kit*, after the verbs having a penultimate उ, if used impersonally or denoting the beginning of action.

According to some the *sêṭ Nishṭhâ* suffixes are not *kit* after the verbs having a penultimate उ if those verbs are used impersonally (bhâva) or denote the beginning of action (âdi-kármân). Thus द्युत् 'to shine' द्युतितमनेन or द्योतितमनेन 'it has been lighted' Similarly प्रद्योतितः or प्रद्युतितः 'he first illumined.' So also मुदितं or मोदितं साधुना । प्रमुदितः or प्रमोदितः साधुः । The word penultimate or *upadhâ* has been defined in I. 1. 65.

Why do we say "when उ is penultimate?"

If the verb has any other vowel than उ as penultimate, then the rule does not apply. As लिखितमनेन 'written by him.' Or विदितम् । Here इ is penultimate, and, therefore, no option is allowed.

Why do we say "when used impersonally or denoting âdikarma?"

This rule has no application where the Nishthâ does not express either भाव 'condition' or 'Impersonal action'; or आदिकर्म 'beginning of action', but is used as a verbal adjective. As रुचितं कार्षापणं ददाति 'he gives a shining coin (called kârshâpaṇa).' Here the word रुचित 'shining' is used as adjective.

Why do we say 'सेट्'?

The rule applies to the Nishṭhâ which takes the intermediate इ and not to others; as, प्रभुक्त ओदनः 'the rice that has been eaten.' Here no option is allowed. So also कुष्टम् ।

Isthti:—This optional form of past participle is restricted in its scope. Those verbs which take the vikaraṇa शप् *i. e.*, the verbs of the *Bhu* class, &c., admit of this option. Thus गुध् 'to wrap up' belongs to the Divâdi class, and therefore, its participle has one form only, as, गुधितं.

३०५७ । निष्ठायां सेटि । ६ । ४ । ५२ ।

णेर्लोपः स्यात् । भावितः-भावितवान् । 'श्वीदितः- (३०३९) इति नेट् । सम्प्रसारणम् । शूनः । दीप्तः । गुहू । गूढः । वनु । वतः । तनु । ततः । पतेः । सनि वेट्कत्वादिडभावे प्राप्ते 'द्वितीया श्रित-' (६८६) इति सूत्रे निपातनादिट् । पतितः । 'सेऽसिचि' (२५०६) इति वेट्कत्वादिड्विकल्पे कृतचृतादीनामीदित्त्वेनानित्यत्वज्ञापनाद्वा तेन 'धावितमिभराजधिया' इत्यादि । 'यस्य विभाषा' (३०२५) इत्यत्रैकाच इत्येव । दरिद्रितः ।

3057. The affix णि is elided before the affixes kta, and ktavatu when these take the augment इट् ॥

Thus भावितः । भावितवान् । So also कारितम् हारितम् गणितम् लक्षितम् ॥

By sûtra VII 2 14 S 3039 the √svi does not take इट् in the Nishthâ. The root is टु ओ श्वि in the Dhâtupâtha Thus श्वि+क्त=शु+त (the vocalisation is by VI 1 15 S 2409)=शू+त (VI 4 2 S 2559)=शूनः (VIII 2 45 S 3019) Similarly from √dîpî (IV 42) दीप्तः √guhû गूढः ।

From √vanu वतः the nasal is elided by VI 4 37 S 2428 √tanu ततः । The root पत is optionally वेट् in the Desiderative by the vârtika तनिपतिदरिद्रादि भ्यः सनो वा इट् वाच्यः (See S 2621) The Nishtha would not therefore, have taken इट् (S 3025) but as Pânini himself has used the form पतितः in II 1 24 S 686 we infer that the prohibition of S 3025 does not apply to पत । Or it may be said that S 3025 is *anitya* (not universally valid) For had it been universally valid the roots कृत चृत नृत took optional इट् by VII 2 57 S 2506, and would therefore have formed their Past Participle without इट् by virtue of S. 3025 What was therefore, the necessity of teaching these roots with a long ई in the Dhâtupâtha (Tudâdi 141 & 35, Divâdi 9) and making them applicable the rule VII 2 14 S 3039 Thus यस्य विभाषा (S 3025) is anitya hence the form धावित &c, are valid as in धावितमिभराज धिया । &c See note under S 3025

Moreover the sutra यस्य विभाषा (S 3025) applies only to monosyllabic roots as the word एकाचः is understood therein from VII 2 10 S 2246 It does not apply to roots having more than one syllable Thus दरिद्रितः from √daridra

३०५८ । क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु । ७ । २ । १८ ।

क्षुब्धादीन्यष्टावनिट्कानि निपात्यन्ते समुदायेन मन्थादिषु वाच्येषु । द्रवद्रव्यसंपृक्ताः सक्तवो मन्थः । मन्थनदण्डश्च । क्षुब्धो मन्थश्चेत् । स्वान्तं मनः । ध्वान्तं तमः । लग्नं सक्तम् । निष्ठानत्वमपि निपातनात् । म्लिष्टमविस्पष्टम् । विरिब्धः स्वरः । 'म्लेच्छ' 'रेभृ' अनयोरुपधाया इत्वमपि निपात्यते । फाण्टमनायाससाध्यः कषायविशेषः । माधवस्तु नवनीतभावात्प्रागवस्थापन्नं द्रव्यं फाण्टमिति वेदभाष्ये प्राह । बाढं भृशम् । अन्यत्र तु क्षुभितम् । क्षुब्धो राजेति त्वागमशास्त्रस्यानित्यत्वात् । स्वनितम् । ध्वनितम् । लगितम् । म्लेच्छितम् । विरेभितम् । फणितम् । बाहितम् ।

3058 The following eight words are formed without इट् augment, in the senses given against them —

1 क्षुब्धः "porridge" or 'a churning stick', 2 स्वान्तः 'the mind', 3 ध्वान्तः darkness', 4 लग्नः 'attached', 5 म्लिष्टः 'indistinct or unintelligible', 6 विरिब्धः 'a note or tone', 7 फाण्टः 'a decoction made without an effort or by an easy process', and 8 बाढः 'excessive'

The word mantha' means fried barley mixed with any liquid substance It also means 'the churning stick 2 Svânta means 'mind, or manas , 3' Dhvânta means darkness 4 Lagna means 'attachment' The त of the nishthâ is changed to न as an irregularity 5 Mlishtham means indistinct or inarticulate speech 6 Viribdha means 'tone or sound These last two words are derived from √mlechchha and √rebhri the penultimates have been changed to इ anomalously 7 Phântam is a decoction made by an easy process But Mâdhava in his commentary on the following text of the satapatha Brahmana (तद् वै नवनीतं भवति घृतं देवानां फाण्टं मनुष्याणाम् ।) says 'phântam is the first particles of butter produced by churning 8 Bâdha means excessive

When the words have not the above senses we have 1 क्षुभितं 'disturbed or agitated The phrase क्षुब्धो राजा is a metaphorical use of the word and shows the anitya nature of âgama rules (as the इट् âgama) 2 स्वनितः as स्वनितो मृदङ्गः स्वनितं मनसा ॥ 3 ध्वनितो मृदङ्ग or ध्वनितं मनसा ॥ 4 लगितं 5 म्लेच्छित (=अपभाषित) 6 विरेभितं from रेभृ 'to sound' or विरिभितं from रिभि ॥ 7 फाणित ॥ 8 बंहित from √बाह 'to strike'

३०५९ । धृषिशसी वैयात्ये । ७ । २ । १९ ।

एतौ निष्ठायामविनये एवानिटौ स्तः । धृष्टः । विशस्तः । अन्यत्र धर्षितः । विशसितः । भावादिकर्मणोस्तु वैयात्ये धृषिर्नास्ति । अतएव नियमार्थमिदं सूत्रमिति वृत्तिः । धृषेरादित्त्वे फलं चिन्त्यमिति हरदत्तः । माधवस्तु भावादिकर्मणोरवैयात्ये विकल्पमाह । धृष्टम्-धर्षितम् । प्रधृष्टः-प्रधर्षितः ।

3059 The Participial affix does not get इट् augment, after the roots धृष् and शस् 'bold, impudent and arrogant'

As धृष्टः विशस्तः ॥ The root धृष् is exhibited in the Dhâtupâtha as ञिधृषा to be impudent (V 22) and as it has an indicatory आ, its past participle would be अनिट् by VII 2 16 S 3036 शस is शसु in the Dhâtu pâtha (I 763) and as it has an indicatory उ by VII 2 56 read with VII 2 15 its Nishthâ is also Anit The special mention of these roots here is for the sake of making a niyama rule namely अनिट् only then when meaning 'impudent', and सेट् in other senses as धर्षितः, विशसितः

"धृष् never forms past participle with the force of भाव (Impersonal action) or आदिकर्म (beginning of action), and therefore VII. 2. 17 cannot apply to it. Therefore it is a niyama rule"—thus says the author of the Kâśikâ. Haradatta says "the use of indicatory ञि in ञिधृषा is of doubtful propriety.". But Mâdhava says "that the option is allowed in the Impersonal and Adikarma when it does not mean impudent." Thus धृष्टं or धर्षितम् bhâva and and प्रधृष्टः and प्रधर्षितः (âdikarma) Bhattiji quotes Haradatta and Mâdhava, and says that धृष् forms participles in those senses, when option is allowed as, धृष्टं or धर्षितं, प्रधृष्टः or प्रधर्षितः not meaning 'impudent'.

३०६० । दृढः स्थूलबलयोः । ७ । २ । २० ।

स्थूले बलवति च निपात्यते । 'दृह दृहि वृद्धौ' । क्तस्येडभावः । तस्य ढत्वम् । हस्य लोपः । इदितो नलोपश्च । दृंहितः-दृंहितोऽन्यः ।

3060. The irregularly formed Past Participle दृढ means 'stout' and 'strong.'

It is derived from दृंह् with क्त affix. In other senses, the forms are दृंहितम् or दृहितम् ॥ There are two roots one दृह् (I. 769) without nasal, and the other दृंह् (I. 770) with the nasal. दृढ can be derived from any one of these by eliding ह, and the nasal, and changing त to ढ, and not adding the augment इट् ॥

The difference between स्थूल and बल is that a man may be stout or स्थूल without being strong (बलवान्) and *vice versa*. The word बल in the sûtra is equal to बलवत् । The irregularity in the formation of दृढ consists in the absence of इट् and the elision of ह् (and of न्, if the root दृंह be taken): and the change of त into ढ ॥ This irregular elision of ह is for the sake of preventing the application of the rule पूर्वत्रासिद्धम् (VIII. 2. 1). The form could have been obtained in the regular way by the elision of ढ, thus: दृह्+त=दृढ्+त (VIII. 2. 31)=दृढ्+ध=दृढ्+ढ=दृ+ढ (VIII. 3. 13)=दृढ ॥ But then when ढ is elided, the rule पूर्वत्रासिद्धम् will apply, and the forms द्रढिमा, द्रढीयान्, द्रढयति could not be obtained. For ऋ is changed to र by VI. 4. 161 only when it is *laghu* or light, but ढ lopa being considered asiddha, the ऋ would be heavy as standing before a conjunct consonant. So also the form परिद्रढय्यागतः could not be obtained: for the णि would not be changed to अय् before ल्यप् when the ऋ is not light or laghu (VI. 4. 56). So also, परिदृढस्यापत्यं=पारिदृढी (the daughter of Parîdṛdha) could not be formed. For ऋ being considered guru or heavy, the affix ष्यङ् would have come in the feminine (IV. 1. 78).

३०६१ । प्रभौ परिवृढः । ७ । २ । २१ ।

'वृह वृहि वृद्धौ' । निपातनं प्राग्वत् । परिवृंहितः-परिबृंहितोऽन्यः ।

3061. The irregularly formed परिवृढ means 'Lord'.

This is formed, like दृढ, from दृंह् or दृह् ॥ When not having the sense of 'Lord', we have परिवृंहितम् and परिवृढितम् ॥

The ह is elided first as an anomaly By so doing we can get the forms like परिवृढयति, परिवृढ्यगतः, पारिवृढीकन्या ॥

३०६२ । कृच्छ्रगहनयोः कषः । ७ । २ । २२ ।

कषेर्निष्ठाया इडन स्यादेतयोरर्थयोः । कष्टं दुःखं तत्कारणं च । 'स्यात्कष्टं कृच्छ्रमाभीलम्' । कष्टो मोहः । कष्टं शास्त्रम् । दुरवगाहमित्यर्थः । कषितमन्यत् ।

3062. The Participial affix does not take the augment इट् after the root कष्, when the participle means 'difficult' and 'impenetrable'.

The word kashta means 'sorrow' and 'its cause', See Amara Kośa I 9 3 As कष्टो मोहः 'delusion is sorrow' i e, cause of sorrow, कष्टं शास्त्रम् 'difficult is the scripture' i e, difficult of penetration कष्टोऽग्निः, कष्टं व्याकरणं ततोऽपि कष्टतराणि सामानि ॥ "Difficult is Fire sacrifice i e, it is difficult to completely master the ritual connected with the worship of fire; and difficult enough is Grammar, but the Sâmans are worst of all'. कष्टानि वनानि 'impervious forests' कष्टाः पर्वताः ॥ When not having these senses, we have कषितं सुवर्णम् ॥

३०६३ । घुषिरविशब्दने । ७ । २ । २३ ।

घुषेर्निष्ठायामनिट् स्यात् । घुष्टा रज्जुः । 'अविशब्दने' किम् । घुषितं वाक्यम् । शब्देन प्रकटीकृताभिप्रायमित्यर्थः ।

3063. The Participal affix does not take the augment इट्, after the root घुष् in any sense other than that of 'proclaimed.'

